# केन्द्रीय विद्यालय संगठनम्, रायपुर संभाग:
# सत्रान्त परीक्षा (2024-25)

**नाम :-------------------------------- अनुक्रमांक------------------ दिनांक :---------------------**

**पूर्णांकः - 60 विषयः संस्कृतम् कक्षा: सप्तमी वर्ग ----------- समय :- 2½ होरा:**

हस्ताक्षर निरीक्षक:- .....................................

सामान्यनिर्देशा:-

1.अस्मिन प्रश्नपत्रे चत्वारःभागाःसन्ति|

खण्ड क- अपठित-अवबोधनम् = 10 अङ्काः
खण्ड ख- रचनात्मककार्यम् = 10 अङ्काः
खण्डग- अनुप्रयुक्तव्याकरणम् = 15 अङ्काः
खण्डघ - पठित-अवबोधनम् = 25 अङ्काः

2. समस्ता: प्रश्ना: अनिवार्या: सन्ति।
3.प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि।

.........................................................................................................................................

**खण्ड: "क" अपठित – अवबोधनम् -10 अङ्का:**

**प्रश्नः 1. अधोलिखितम् अनुच्छेदं पठित्वा दत्तानां प्रश्नानाम् उत्तराणि लिखत-**

हिमालय: भारतस्य उत्तरस्यां दिशायाम् स्थित:। एष: हि संसारस्य उन्नततम: पर्वत:। माउँट-एवरेस्ट इति हिमालयस्य उन्नततमम् शिखरम्। इदम् शिखरम् नेपालदेशे स्थितम्। अनेका: नद्य: हिमालयात् निर्गच्छन्ति। देशस्य च विशालं भूभागं सिञ्चन्ति। अयं गिरि: अनेकासां वनस्पतिनाम् अपि आलय:। अत्र अनेका: ओषधय: जायन्ते। हिमालस्य कानिचित् शिखराणि सर्वं वर्ष हिमेन आच्छादितानि। पर्यटका: अत्र हिमक्रीड़ानाम् आनन्दम् अनुभवितुम् आगच्छन्ति। हिमालय: पर्वतानां राजा अस्ति |

क) **एकपदेन उत्तरत –** (1x3=3)

1) पर्वतानां राजा कः अस्ति ?

उत्तर :- ---------------------------------------------------------------------------------

2) माउँट-एवरेस्ट इति कस्य उन्नततमम् शिखरम्।?

उत्तर :- ---------------------------------------------------------------------------------

3) अत्र अनेका: का: जायन्ते ?

4) उत्तर :- ---------------------------------------------------------------------------------

**(ख) पूर्णवाक्येन उत्तरत**

**(2x2=4)**

(1) पर्यटकाः अत्र किमर्थम् आगच्छन्ति?

उत्तर :- ---------------------------------------------------------------------------------

(2) कानि सर्वं वर्षं हिमेन आच्छादितानि?

उत्तर :- ---------------------------------------------------------------------------------

**(ग) निर्देशानुसारम् विकल्पेभ्य: उचितम् उत्तरम् चिनुत-**

**(1x3=3)**

(1) **"एकः"** इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ? ( आलयः , भूभागं, अनेकाः )

(2) **"पर्वतः"** इति पदस्य पर्यायपदं किं प्रयुक्तम् ? ( उन्नतः , गिरिः, विशालं )

(3) "**अत्र अनेका: ओषधय: जायन्ते।**" अत्र क्रियापदं किम् ? ( ओषधय:, जायन्ते, अनेका: )

***खण्ड: ख - रचनात्मक- कार्यम्* (10)**

**प्रश्नः 2. चित्रं दृष्ट्वा मंजूषात: पदानि च प्रयुज्य पञ्च वाक्यानि रचयत- (1x5 =5)**

| |
|---|
| **मञ्जूषा-** खगा:, विकसन्ति ,कमलानि, उदेति, क्रीडन्ति, डयन्ते, सूर्य:, चित्रपतंगा:, कूजन्ति, बाला: |



उत्तर :- - --

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

**प्रश्नः 3. मंजूषात: उचितपदानि चित्वा अनुच्छेदस्य रिक्तस्थानानि पूरयत - 1/2 x10 =5**

| |
|---|
| गजः, चटका, श्रुत्वा, किमर्थं, सन्ततिः, शुण्डेन, अण्डानि, भुवि, खगः, व्यलपत् |

पुरा एकस्मिन् वृक्षे एका (1)................................ प्रतिवसति स्म। कालेन तस्याः (2)....................................... जाता। एकदा कश्चित् प्रमत्त: (3)..................................... तस्य वृक्षस्य अधः आगत्य तस्य शाखां (4)................................ अत्रोटयत्। चटकाया: नीडं (5).............................................. अपतत्। तेन (6)................................ विशीर्णानि । अथ सा चटका 7)........................................ । तस्याः विलापं (8)........................................... काष्ठकूटः नाम 9)....................................दु:खेन ताम् अपृच्छत्- " भद्रे, (10)........................................ विलपसि ? "इति।

***खण्ड: ग-अनुप्रयुक्त-व्याकरणम्(15)***

**प्रश्नः4. सन्धि विच्छेदं पूरयत- 1x3=3**

(क) ग्रामं प्रति = ग्रामम् + ______

(ख) कार्यार्थम् = ______ + अर्थम्

(ग) करिष्यत्येषा = करिष्यति + ______

**प्रश्नः 5. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानानि पूरयत- 1x3=3**

(क)________नमः । (हरिं/हरये)

(ख)_______ परितः कृषि क्षेत्राणि सन्ति। (ग्रामस्य /ग्रामम्)

(ग) _______ उपरि अभिनेता अभिनयं करोति। (मञ्चस्य/मञ्चम्)

**प्रश्नः 6. उदाहरणानुसारं धातुरूपाणि लिखत- 1X3=3**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| प्रथम | मरिष्यति | .......... | मरिष्यन्ति |
| प्रथम | ............ | पतिष्यतः | पतिष्यन्ति |
| प्रथम | गमिष्यति | गमिष्यतः | ........... |

**प्रश्नः 7. मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत- 1x3=3**

| | | |
|---|---|---|
| पतिष्यति | त्रोटयति | अनयत् |

क. गजः शुण्डेन वृक्षशाखाः................................।

ख. काष्टकूटः तां मक्षिकायाः समीपं.................................. ।

ग. गजः गर्ते.................................. ।

**प्रश्नः8. विलोमपदानि मेलयत- 1x3=3**

(क) मन्दम् उच्चैः

(ख) नीचैः स्निग्धम्

(ग) कठोरः क्षिप्रम्

***खण्ड घ*- पठित-अवबोधनम् 25**

**प्रश्नः9. अधोलिखितम्पद्यांशंपठित्वाप्रदतानांप्रश्नानाम्उत्तराणिलिखत्-**

चटका वदत्-"दुष्टेनैकेन गजेन मम सन्ततिः नाशिता । तस्य गजस्य वधेनैव मम दुःखम् अपसरेत्।'" ततः काष्ठकूटः तां वीणारवा-नाम्न्याः मक्षिकायाः समीपम् अनयत्। तयोःवार्तां श्रुत्वा मक्षिका वदत् - 'ममापि मित्रं मण्डूकः मेघनादः अस्ति । शीघ्रं तमुपेत्य यथोचितं करिष्यामः।" तदानीं तौ मक्षिकया सह गत्वा मेघनादस्य पुरः सर्वं वृत्तान्तं न्यवेदयताम्।

**क) एकपदेन उत्तरत – (1x2=2)**

1.चटकायाः संततिः केन नाशिता?

उत्तर :- ---------------------------------------------------------------------------

2.मक्षिकायाः नाम किम्

उत्तर :- ---------------------------------------------------------------------------

**ख. पूर्णवाक्येन उत्तरत –**

**(1x2=2)**

1.चटकाया: दुखं कथम् अपसरेत्?

उत्तर :- ------------------------------------------------------------------------------

2.मण्डूकस्य नाम किम् ?

उत्तर :- ------------------------------------------------------------------------------

**ग.निर्देशानुसारम् उत्तरत-** **(1/2x2=1)**

1.'ममापि मित्रं मण्डूकः मेघनादः अस्ति | अत्र क्रियापदं किम् ?

(क) मेघनादः (ख) मण्डूकः (ग) अस्ति (घ)अपि

2. **"सुखम्"** इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(क) नाशिता (ख) दुःखम् (ग) श्रुत्वा (घ) अपि

**प्रश्नः 10. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

"विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्

विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।

विद्या बन्धुजनो विदेशगमने विद्या परादेवता

विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ।।

**(क) एकपदेन उत्तरत –** **(1x2=2)**

1. विद्या कीदृशं धनम् ? उत्तर :- -----------------------------------------
2. विद्या केषां गुरुः ? उत्तर :- -----------------------------------------

**ख. पूर्णवाक्येन उत्तरत –**

**(1x2=2)**

(1) विद्या कुत्र बन्धुः ?

उत्तर :- ------------------------------------------------------------------------------

(2) विद्या कुत्र पूज्यते ?

उत्तर :- ------------------------------------------------------------------------------

**ग.निर्देशानुसारम् उत्तरत-** **(1/2x2=1)**

1) **"दुःखकरी'** इति पदस्य विलोमपदं किं प्रयुक्तम् ? (भोगकरी, सुखकरी , परादेवता, )

2) **'बन्धुः'** इतिपदस्य समानार्थकपदं पद्यांशात् चित्वा लिखत- (यशः , मित्रम् , धनम्

**प्रश्नः 11.रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –**

**(1x4=4)**

(क) **<u>मालिनी</u>** द्वारमुद्घाटयति?

उत्तर :- -----------------------------------------------------------------------------------

(ख) दर्शनातस्याः पुत्री च मिलित्वा **<u>परिवारस्य</u>** भरणपोषणं कुरुतःस्म ।

उत्तर :- ---------------------------------------------------------------------------------

(ग) संस्कृते ज्ञानविज्ञानयोः **<u>निधिः</u>** सुरक्षितोऽस्ति ।

उत्तर :- ---------------------------------------------------------------------------------

(घ) शल्यक्रियायाः वर्णनं **<u>संस्कृतसाहित्ये</u>** अस्ति।

(ङ) उत्तर :- ---------------------------------------------------------------------------------

**प्रश्नः 12. समुचित मेलनं कृत्वा लिखत।**

**(1x4=4)**

| | | |
|---|---|---|
| (क) कौटिल्येन | - | अभ्युदयाय प्रेरयन्ति |
| (ख) सूक्तयः | - | अर्थशास्त्रं रचितम् |
| (ग) संस्कृतम् | - | चरकसुश्रुतयोः योगदानम् |
| (घ)चिकित्साशास्त्रे | - | ज्ञानविज्ञान-पोषकम् |

**प्रश्नः 13. .भिन्नप्रकृतिकं पदं चिनुत-**

**(1x3=3)**

**यथा**- व्याघ्रः, भल्लूकः, गजः, कपोतः - <u>कपोतः</u>

(क)गच्छति, पठति, धावति,अहसत् - .........................

(ख)पत्रम्, फलम्,मित्रम्, पुष्पम् - .........................

(ग) पृथिवी, यानम्,वसुन्धरा, धरित्री - .........................

**प्रश्नः 14. उपयुक्त कथनानां समक्षम् 'आम्' अनुपयुक्त कथनानां समक्षं 'न' इति लिखत**

**(1x4=4)**

क. विद्या नाम नरस्य कीर्तिरतुला। .......................

ख. अद्यत्वे शिक्षा अस्माकं मौलिक: अधिकार:। ......................

ग. घोटकराज: क्षिप्रं न धावति। .......................

घ. शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभट: अकरोत्। .......................